IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# भट्टारकदेवशक्रविरचितप्रतापकाव्यस्य तृतीयसर्गस्य सम्पादनम् – एकमध्ययनम्

**डॉ. शशिकुमारशर्मा**
**सहायक-आचार्यः, व्याकरणविभागः**
**जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपत्तनम्**

**समीक्षात्मकभागः**

प्राचीनकालाद् वेदानां, शास्त्राणां चाध्ययनम्, अध्यापनं मुख्यं पवित्रं कर्मेति मन्यते। शास्त्राणामध्ययनमध्यापनं तदैव अतीव सुकरं भवति यदा तच्छास्त्रस्यानुकूला पद्धतिराश्रीयते। नैकविधानां गद्यपद्यव्याकरणादीनां नाना शास्त्राणां साहित्यव्याकरणदर्शनादीनां पाठनं कथं वा करणीयमिति विषये शिक्षाविधाः प्राचीनार्वाचीनशिक्षणपद्धतीर्विमर्श्य निर्दुष्टरूपेणानुकूलपद्धतयः निरूपिताः।

अत एव प्राचीनार्वाचीनशास्त्राणां पूरकशास्त्रं शिक्षाशास्त्रमिति विदुषामभिप्रायः। कः विषयः, कया पद्धत्या पाठनीयम्, कया पद्धत्या नाध्यापनीयम् इति प्रवृत्तिनिवृत्तिजनकत्वात् शिक्षाशास्त्रस्य शास्त्रत्वं सिद्धम्। वस्तुतः शिक्षाशास्त्रिणः विषयानुकूलां पद्धतिं पाठयन्ति। यथा साहित्यशास्त्रस्य टीकापद्धतिः, व्याकरणस्य आगमन-निगमनपद्धतिः, पद्यस्य अन्वयविधिरिति। अस्मिन्नेव क्रमे संस्कृतशिक्षणे मया एका नूतनपद्धतिराश्रिता। का सा नूतनपद्धतिः, सा आकाङ्क्षापद्धतिः। आङ्-उपसर्गपूर्वककाङ्क्षिधातोः अच्-टाप्प्रत्ययाभ्याम् आकाङ्क्षा इति शब्दो निष्पद्यते। अपेक्षा, जिज्ञासा, अनुसन्धानम् इत्याद्यर्थेषु शब्दोऽयं प्रयुज्यते। सांख्यकारिकाव्युत्पत्तिवादवाक्यपदीयसदृशदुरुहविषयाणामपि आकांक्षापद्धत्या अध्यापनं भवितुं शक्यते, तेन शिष्याः समीचीनरीत्या अवगन्तुं शक्नुवन्ति।

शिक्षामनोविज्ञानानुसारं सर्वेष्वपि स्तरेषु प्रायः कण्ठस्थीकरणं निरस्तमभवत्। अत्र प्रश्नोत्तरपद्धत्या अध्यापनसमये आकाङ्क्षायाः आधारभूतं पदं कारिकायाः निष्कास्य तदाधारेण प्रश्नं पृच्छति। शिक्षार्थिनः तस्य प्रश्नस्य उत्तरं कारिकायां प्रयुक्तपदाधारेणैव ददाति। एवमासान्तं कारिकां पाठयति। वारं वारं कारिकायां विद्यमानानां पदानां प्रयोगेण तत्तत्पदानाम् उच्चारणाभ्यासो भवति। तथा च विना कण्ठस्थीकरणेन कारिकां स्मरति। सांख्यकारिकायाः कारिकाणां पाठनम् आकाङ्क्षापद्धत्या कथं वा करणीयम् , येन छात्राः अल्पश्रमेण अधिकविषयज्ञानं प्राप्नुयुः।

शोधावसरे भारतदेशस्याप्रकाशितमनुद्घाटितमस्पृष्टं ज्ञानरूपमातृकाणां स्थितिं ज्ञात्वा तासां प्रकाशनार्थं मया प्रतिज्ञा कृता। अत एव मत्प्रतिज्ञापूरणांशत्वेन अप्रकाशितपाण्डुलिपिमाश्रित्य शोधकार्यमिदं प्रचलति।

अस्मिन्नेव क्रमे अप्रकाशितमातृकायामपि आकाङ्क्षापद्धतिः आसीत् वा न वा इति, किं प्राचीनकालेऽपि आकाङ्क्षापद्धत्या पठनपाठनं भवति वा इति च मनसि प्रश्नः जातः। अप्रकाशितमातृकासु अन्वेषणं कृतम्। व्याख्यानग्रन्थस्वरूपं व्याचक्षाणेन भगवता पतञ्जलिनोक्तम् – न केवल चर्चा पदानि व्याख्यानम्- वृद्धिः आत् ऐज् इति किं तर्हि उदाहरणं प्रत्युदाहरणं, वाक्याध्याहारश्चेत्येतत् समुदितं व्याख्यानं भवति। एवमेव अन्यत्र उक्तम् –

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम्।।**

श्लोकेनानेन स्पष्टं यत् व्याख्याने पदच्छेद-पदार्थ-समासविग्रहानुवृत्ति-वाक्ययोजना-उदाहरण-प्रत्युदाहरणपूर्वपक्षसमाधानानां प्रायः समावेशो भवति स्म। इमं विधिमाश्रित्य भट्टारकदेवशक्रमहोदयेन प्रतापकाव्यं रचितम्।

**मातृकायाः सामान्यपरिचयः –**

अस्य ग्रन्थस्य एका मातृका जयपत्तनस्थजैनदिगम्बरप्राकृतापभ्रंशसाहित्याकादमिग्रन्थालये विद्यते। अस्याः मातृकायाः प्रतिकृतिः ग्रन्थस्यास्य सम्पादनाय स्वीकृता।

**ग्रन्थस्य सामान्यपरिचयः -**

अस्मिन् ग्रन्थे द्वात्रिंशद्सर्गाः सन्ति। अत्र ग्रन्थकारेण शिखरिणीवृत्तबद्धश्लोकस्य आकाङ्क्षापद्धत्या व्याख्यानं विहितम्। अस्मिन् श्लोके भगवतः श्रीरामचन्द्रस्य प्रतापविषयः वर्णितः। अत्र प्रथमं तु मङ्गलाचरणं तत्पश्चात् प्रतापकाव्यस्य विषये लिखितम्। अस्य ग्रन्थस्य सम्पादितेकैकस्य सर्गस्य पत्रिकायां प्रकाशनं भवेत् इति मनसि निधाय सुधियां स्वान्तमावर्जयेत्तर्हि मन्ये सफलोऽयं मे प्रयास इति। प्रथमद्वितीयसर्गयोः प्रकाशनं जातम्। इदानीं मया तृतीयसर्गस्य वर्णनं सम्पादनञ्चात्र क्रियते।

**सम्पादनभागः**

**श्रीगणाधिपतये नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।**

**स जयति परमात्मा यस्य लोको हि मग्नो**
**मननवरसमुद्रे कृष्णिकावद्विभाति।**
**त्रिभिदरमुदरेयं खेंशुमव्वाहिके वा**
**मणिरिव शुभरत्नं रोहणाद्रौ यथा वा।।1।।**

**गुरुपदकमलं प्रणौमि भक्त्या**
**हृदि मयि सततं करोमि शक्त्या।**
**ऋजुमनवचनैः स्तवीमि सूक्त्या**
**नततनुशिरसा यवीमि युक्त्या।। 2।।**

**यस्याः प्रसक्तेर्गुणरत्नखानेर्जडार्थदात्र्यासु पदार्थपात्र्याः।**
**विशालबोधाः प्रभवन्त्यबोधाः प्रणौमि तां तत्प्रभुवक्त्रजाङ्गाम्।।3।।**

**प्रतापकाव्यं रचयामि कामधेन्वाख्यकं षोडशवृत्ततो वै।**
**एकेन काव्येन तथैव युग्मपक्षेन भिन्नैः रसपङ्क्तिवृत्तैः।।4।।**

भूपेन्द्रवृत्तं जगति प्रसिद्धभाषासु चेच्छिलष्टतरं भवेद्वै।
तत्संस्कृते किं बहुभिस्सदर्थैः क्लृप्तं मनोहारि सतां भवेन्न।।5।।
एकार्थतो यत्र भवेद्द्वितीयोऽप्यर्थोऽत्र चित्रप्रदमेव लोके।
काव्ये पुनर्यत्र युगत्रिपक्षार्थाः किं न युक्तं गुणिनां मुदे तत्।।6।।
अर्थप्रकाशोऽत्र न चास्ति विज्ञाष्टीकां विना वाध्ययनादृतेऽपि।
एकाक्षरीकोषसुशब्दयुक्त्या विमर्शनीयः स्पृहया विनाहो।।7।।
मादर्यवन्तोऽत्र भवेयुरस्य विज्ञा वयं किं पठनेन वित्त।
राजेन्द्रचेतो हरकं तदेतत्सदर्थसारं न परं कदर्थम्।।8।।
कवीन्द्रमाना नृपतेः सभायां काव्यं पठन्तु[1] परमादरेण।
परं सुखं नास्ति परत्र विज्ञाः प्रतापकाव्यस्य विमर्शनात्तत्।।9।।
क्व सूर्यवंशप्रभवो नृपोऽसौ क्व चात्र बुद्धिर्मम दुर्बलार्था।
तथापि राजेन्द्रगुणा बलान्मां वाचाल्यते चूतपिकेव चैत्रे।।10।।
सन्त्येव सन्तो भुवि ये गुणेषु पराः परेषां ग्रहणेषु गृध्राः
प्रयोजनं तेऽपि विना धरित्र्यां जीयासुरत्रापरकृत्य विज्ञाः।।11।।
जीयासुरन्येऽपि हि दुर्जनाख्याः निष्कारणं ये परदोषगृध्राः।
येषां भिया न स्खलते[2] सतां धीरहो महानेष मतो गुणो मे।।12।।
नाना कवित्वेषु चणास्तथापि
प्रतापकाव्यं वदनेषु यूयम्।
ताम्बूलवत्कृत्य नृपस्य गोष्ट्यां
विशंतु विज्ञाः कुपमुन्मनाश्चेत्।।13।।
यथापरे मिष्टतराः सिताऽग्रे विभान्ति लोके हि कथापरा वा।
रामायणीभागवतीकथाऽग्रे काव्यानि विश्वानि तथैतकाग्रे।।14।।
इदं प्रबन्धं विरचय्य पूर्वं सूत्रं प्रवक्ष्ये प्रथमं हि तस्य।
द्वात्रिंशदर्थप्रसरप्रदस्य काव्यस्य स्वोपज्ञविनिर्मितस्य।।15।।

इति पीठिका।

सरामो रामोऽसौरमणिगणगौणज्ञयगुणः।
सकृष्णाभः कृष्णो हुतभुवनकालुष्यकलनः।।
प्रतापेट्शंकर्त्ता शिवपदिशिवो वोऽवनकरो

[1] [illegible]
[2] [illegible]

**विधेः कर्त्ता वेधाः सकलविधिदो भूपभवतु।।**

**अस्यार्थः** – हे प्रतापेट् प्र इति वियोगार्थे। प्र इति शत्रुजननारीणां स्वभर्तृवियोगेन तापयति तापं करोति योऽसौ प्रतापस्तेन ईड्यते स्तूयते योऽसौ प्रतापेट्। अर्थात् तव प्रतापेन शत्रवः पलायन्ति तन्नारीणां भर्तृवियोगाग्निना तापकारको भवान्। हे प्रतापेन स्तुतिधारका हे भूप भुविस्थाने या इति श्रुतं श्रवणं कथाया यस्य सः भूपस्तस्य संबुद्धौ हे भूप। अर्थात् स्वसौधेषु हरिकथाश्रवणेन जन्मसाफल्यकारक इति भावः। स्थानभूम्योस्तु भूस्त्रियां इति विश्वः। पापातरि तथा श्रुते इति सुधाफलशकृतैकाक्षर्य्याम्। शिवः इति शिवदेवो वो युष्माकम्। अवनकरो भवतु पालना करोस्तु।

ह्रॄ **किं भूतः शिवः – सरामः।**

राम या पार्वती देव्या सहितः।

ड्ढॄ **पुनः कीदृशः शिवः – रामः।**

नानाविधक्रीडाकरणेन स्वमात्मानं रमयतीति रामः क्रीडाविधायीत्यर्थः।

ड्डॄ **पुनः कीदृशः शिवः – असौ।**

नास्ति सस्य विश्वस्य ओ(ऋ) रक्षणं यस्य सः असौ विश्वसंहारकारक इत्यर्थः। आकाशे विहगे विश्वेशं श्रेयसि सुखेऽपि च इति सुधाफलशकृतैकाक्षर्य्याम्। ओकारः पुरुषे चन्द्रे कुम्भेव णिजिरक्षके इति इरुगपदण्डाधिनाथकृतनानार्थरत्नमालायाम्। शसयोरैक्यं चित्रालङ्कारत्वात्।

ल्लॄ **पुनः कीदृशः शिवः – रमणिगणगौणज्ञः।**

रमणी पार्वती राज्ञी गणा इति अष्टौ संख्याः पृथ्वीजलाद्यागणाश्च गौ इति वृषभो नन्दिनः नन्दिकेश्वरश्च रमणिगणगावस्तेषां णम् इति दर्शनस्तेन ज्ञो ज्ञानं यस्य सः रमणिगणगौणज्ञः णं दर्शनमिति स्मृतम् इति सौभरिकृतैकाक्षर्य्याम्। अथवा

रमणी पार्वती च गणा अष्टौ च तेषां गौणाः गुणसमूहास्तेषां ज्ञ इति ज्ञाता योऽसौ रमणिगणगौणज्ञः।

श्वॄ **पुनः कीदृशः शिवः – अगुणः।**

नामैकदेशे नामग्रहणम् अतः। अ इति अग्निवत् गुणो यस्मिन्स अगुणः कामदाहकत्वात् अग्निगुणधारीत्यर्थः।

स्नॄ **पुनः किंविशिष्टः शिवः – सकृष्णाभः।**

सह कृष्णेन गरलेन आसमन्ताद्भातीति सकृष्णाभः। अर्थात्कण्ठेकाल इत्यर्थः। अथवा समाना समरूपा कृष्णा इति द्राक्षावल्ली तया आसमन्ताद्भाति शोभते सः सकृष्णाभः। अर्थात् कैलाशे कुत्रचित् द्राक्षामण्डपे कदाचित् शिवः पार्वतीसार्द्धं क्रीडति तत्कालावस्थासूचकविशेषणमिदम्। कृष्णा तु द्रोपदी नीलीकणाद्राक्षासु कथ्यते इति विश्वः।

स्नॄ **पुनः किंविशिष्टः शिवः – कृष्णोः ।**

कृष्णे इति कृष्णपक्षसदृशे अन्धकारबहुले कलियुगे ओ इति रक्षा यस्माज्जीवानां स्मरणभजनकरणात्सः कृष्णो।

स्रॄ **पुनः किंविशिष्टः शिवः – हतभुवनकालुष्यकलनः।**

हतः संहारितो यो भुवनः लोकस्तेन कालुष्यस्य कलुषभावस्य कालिमायाः। कलना यस्य सः हतभुवनकालुष्यकलनः। लोकसंहारकारकत्वात्कालिमाधारीत्यर्थः।

ह्मऋ **पुनः किंविशिष्टः शिवः – शंकर्ता।**

शंकर इति पर्यायनामधारकः। शं सुखं प्राणिनां करोतीति शंकरः। अथवा शं सुखं प्राणिनां कर्त्ता छेदको योऽसौ शं कर्त्ता सुखो छेत्ता संहारकरणकाले प्राणिनां सुखहारीत्यर्थः।

ह्ड्ढऋ **पुनः किंविशिष्टः शिवः – शिवपदिः।**

शिवस्य मुक्तेः पानां इति पापीप्राणिनां संसारिजीवानान्दिर्दानीयोऽसौ शिवपदिः। अर्थात् संसारवासीजीवानां भजनस्तवनध्यानकरणात् मुक्तिपदस्य दाता इत्यर्थः। नः प्रागुक्तोऽथपः पापी इति सौभरिकृतैकाक्षर्य्याम्। तत्रैव दिर्द्दानीदीसुधानाथो इति अथवा

पुनः किंविशिष्टः शिवः शिवपदिः। शिवे कैलाशे पत् इति चरणानाम् इ इति रचना यस्य सः शिवपदिः। अर्थात् कैलाशपर्वतस्थानस्थायीत्यर्थः।

ह्हऋ **पुनः कीदृशः शिवः – अविधेः कर्त्ता।**

न विधिर्विधानं कर्त्तव्यता रूपं यः करोतीति अविधेः कर्त्ता सृष्टिसंहाररूपा अविधिस्तद्रचक इत्यर्थः।

ह्ड्ढऋ **पुनः किंविशिष्टः शिवः – वेधाः।**

वशब्देन वृषभस्तेन ईगतिर्गमनं तस्य धाधारणा यस्य सः वेधाः। वृषभेन गतिभाक् इत्यर्थः।

ह्ड्ढऋ **पुनः किंविशिष्टः शिवः – सकलविधिदः।**

सकलं च विधिर्विधानं च तत् द्यति खण्डयतीति सकलविधिदः। सृष्टिसंहारकारणत्वात्सकलविधिखण्डनकर[3] इत्यर्थः।

अथवा कलया सहितो विधिर्विधानं कर्त्तव्यता यस्मात्सः सकलविधिः पुत्रस्तं ददातीति सकलविधिदः। महादेवव्रतं चतुर्द्दश्यां पुत्रार्थं स्त्रियः कुर्वन्तीति हेतोः पुत्रप्राप्तिकर इत्यर्थः।

अथवा स इति उमासुतः पार्वतीपुत्रस्तं कलं मनोहरं विधिं राज्यादिसामग्रीं ददाति यस्सः सकलविधिदः। सः पुंस्युमासुते वायौ इति इरुगपदण्डिकृतैक्षर्य्याम्।

अथवा सम् इति स्पन्दनपथेन रथमार्गेण कला मनोज्ञा या विधिः गमनविधिः वैदनाथयात्रां प्रतिगमनं कात्वभारवहनजलं तेन दं शरणं भाक्तिकानां योऽसौ सकलविधिदः। वैदनाथयात्राकारकाणाम् उत्तमविधिदाता इति भावः।

अथवा सैर्जलैः कलो मनोहरो विधिर्विधानं तत्र ध्यानेन द इति संयोगो वरदानप्रदो यस्य सः सकलविधिदः। अर्थात् यत्र पर्वतादिषु गोमुखाकारेण जलपातो भवति शिवप्रतिबिम्बोपरि तत्र शिवस्य यात्रा भवति तत्स्थानाद्ध्यानेन जीवाः सम्यग्विधिं प्राप्नुवन्तीति भावः। सो दले निकरे नीरे इति कालिदासकृतैकाक्षर्य्याम्। तत्रैव स्याद्दः प्रश्रमसंयोग इति।

अथवा सकलविधिदः सश्चकश्च सकौ ताभ्यां ल इति लश्चो विधिर्विधानं तत्र दम् इति दानं वैराग्यश्च यस्य सः सकलविधिदः। अर्थात् होतारः शिवाग्रे जलकुण्डे अन्नहोमम् अग्निकुण्डेषु घतादिहोमं कुर्वन्ति तदा तेषां वैराग्यावस्थाब्राह्मणानां केशसंरक्षणादिर्भवति अनस्तेषां वैराग्यप्रदः।

अथवा दानप्रद इत्यर्थः। को ब्रह्मात्मानि लार्कोग्नि इति कालिदासकृतैकाक्षर्य्याम्।

इति शिवपक्षार्थम्।।3।।

[3] □□□□□□□ □□□ □□□□□□□□□ □□□□□

© 2019 IJCRT | Volume 7, Issue 1 January 2019 | ISSN: 2320-2882

श्रीमच्छ्रीजयसिंहराजतनयो भून्माधवादिर्हरिस्तस्माद्योजनि सर्वभूपमुकुटालङ्कारश्रूपो भुवि।।

तस्य श्रीलप्रतापसिंहनृपतेः काव्ये प्रतापाद्वये श्रीभट्टारकदेवशक्ररचिते सर्गस्तृतीयो गतः।

।। इति श्रीप्रतापकाव्यवृत्तौ तृतीयः सर्गः।।3।।